# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
# सत्रान्तपरीक्षा- एप्रिल,२०१९

कक्षा:- शास्त्री-२ (SEM-4) | प्रश्नपत्रम् - ६ | गुणाः - ७०

विषयः: सर्वदर्शनम् | (CC.2.4.8) | समयः०३:०० तः ६:००

दिनाङ्कः :०४/०४/२०१९

ग्रन्थः – न्यायसिद्धान्तमुक्तावली
(जलनिरूपणादरभ्य प्रत्यक्षखण्डान्ता)

---

विभागः-१

प्रश्नः-१ निम्नलिखितेषु द्वयोः व्याख्यां लिखत। (१०)

(१) नित्याऽनित्यसाधारणजलत्वजातिसिद्धिं व्याख्यात।

(२) वायुतेजसोः कार्यरूपं स्पष्टीकुरुत।

(३) वायुसाधकान्यनुमानानि प्रदर्शयत।

प्रश्नः-२ निम्नलिखितयोः एकस्य व्याख्यां विशदतया लिखन्तु। (१०)

(१) अभास्वरशुक्लेतरेत्यादिलक्षणं प्रतिपदव्यावृत्तिपुरस्सरं व्याख्यात।

(२) सुवर्णस्य तैजसत्त्वसिद्धिं साधयत।

विभागः-२

प्रश्नः-३ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत। (१०)

(१) कालदिशोः उपाधयः प्रदर्श्यताम्।

(२) क्षणिकविज्ञानमेवात्मेति मतमुपस्थाप्य खण्डयत।

(३) नित्यविज्ञानात्मवादिमतं कथं न समीचीनमिति व्याख्यात।

प्रश्नः-४ निम्नलिखितयोः एकस्य व्याख्यां विशदतया लिखतु। (१०)

(१) पृथिव्यादिपञ्चद्रव्याणां भूतत्वं यथाग्रन्थं व्याख्यात।

(२) शरीरेन्द्रियमनसामात्मत्वं प्रतिपाद्य वारयत।

विभागः-३

प्रश्नः-५ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत। (१०)

(१) प्राचीननवीनमतभेदेन बहिरिन्द्रियद्रव्यप्रत्यक्षे किं कारणम्? व्याख्यात।

(२) बुद्धेः प्रपञ्चं विवेचयत।

(३) अलौकिकसन्निकर्षं व्याख्यात।

प्रश्नः-६ निम्नलिखितयोः द्वयोः एकस्य व्याख्यां विशदतया लिखतु। (१०)

(१) ‘उद्भूतरूपसम्बन्धस्तु उभयमादायैवे’ति ग्रन्थं व्याख्यात।

(२) "विषयेन्द्रियसम्बन्धो व्यापारः, सोऽपि षड्विधः" व्याख्यात।

प्रश्नः-७ निम्नलिखितप्रश्नेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु। (१०)

१. अपाकजोऽनुष्णाशीतस्पर्शः कुत्र स्वीकृतः ?
२. जलीयशरीरं कीदृशम् ?
३. किं नाम आकाशत्वम् ?
४. जगतामाश्रयः कः ?
५. का दिगुच्यते ?
६. सांख्यमते पुरुषः कीदृशः ?
७. मनोमात्रस्य गोचरः कः ?
८. प्रत्यक्षलक्षणं किम् ?
९. आत्मा विभुरणुर्वा ?
१०. घ्राणजादिप्रभेदेन प्रत्यक्षं कतिविधम् ?
११. मनोग्राह्यं किम् ?
१२. संयोगः कुत्र सन्निकर्षः ?
१३. तैजसमिन्द्रियं किम् ?
१४. शरीरस्य न चैतन्यं कस्मात् ?
१५. अतीन्द्रियं ज्ञानं कीदृशम् ?

* * * * * * * * * * *

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

# सत्रान्तपरीक्षा- अप्रिल्,२०१९

**कक्षा:- शास्त्री-२** (SEM-4) **प्रश्नपत्रम् -६** **गुणाः - ७०**

**विषयः: सर्वदर्शनम्** **(CC.2.4.8)** **समयः -**

**दिनाङ्कः :** (ग्रन्थः – **न्यायसिद्धान्तमुक्तावली)**

---

**प्रश्नः-७**

१. पवने स्वीकृतः।

२. अयोनिजम् ।

३. शब्दाश्रयत्वम्।

४. कालः।

५. दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते।

६. पुष्करफलाशवन्निर्लेपः।

७. आत्मा।

८. इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्।

९. आत्मा विभुः।

१०. षड्विधं मतम्।

११. सुखं दुःखमिच्छा द्वेषो यत्नो मतिः कृतिः ग्राह्यः।

१२. घटप्रत्यक्षजनने संयोगः सन्निकर्षः।

१३. नयनम्।

१४. मृतेषु व्यभिचारतः।

१५. निर्विकल्पकं ज्ञानम्।